# Purushottamaproktam Kamadevarati Stotram

# पुरुषोत्तमप्रोक्तं कामदेवरतिस्तोत्रम्

## Document Information

Text title : Purushottamaproktam Kamadevarati Stotram

File name : puruShottamaproktaMkAmadevaratistotram.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 63/79-93||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

# पुरुषोत्तमप्रोक्तं कामदेवरतिस्तोत्रम्

श्रीपुरुषोत्तम उवाच ।
चैत्रमासे शुक्लपक्षे ह्येकादश्यां प्रगे शुभे ।
गत्वाऽऽरामे ग्रहीतव्या दिव्या दमनमञ्जरी ॥ ७९॥

गुर्वाज्ञया प्रकर्तव्यं पूजनं दमनस्य वै ।
दमने तिष्ठते कामदेवश्च रतिसंयुतः ॥ ८०॥

“कामदेव नमस्तेऽस्तु त्वं सदा पुरुषोत्तमः ।
हरिं कामं विचिनोमि कृपां कुरु ममोपरि” ॥ ८१॥

गीतवादित्रनिर्घोषैरानेतव्यो गृहं प्रति ।
अधिवासनपूर्वं च सर्वतोभद्रमण्डले ॥ ८२॥

स्थापयित्वा हरिं कामं रतिं च दमनद्रुमम् ।
आच्छाद्य श्वेतवस्त्रेण पूजयेत् कन्यका प्रिये ॥ ८३॥

क्लीं कामदेवाय नमो ह्रीम् ।
रत्यै च नमो नमः ।
पूर्वस्यां ह्रीं च कन्दर्पं पूजयामि निशाऽऽगमे ॥ ८४॥

गन्धपुष्पाक्षतधूपदीपनैवेद्यकैः शुभैः ।
आरार्त्रिकादिभिर्दैवं पूजयामि पतिं प्रभुम् ॥ ८५॥

मदनाय नमः प्राच्यां मन्मथाय नमोऽग्निके ।
कन्दर्पाय नमो याम्येऽनङ्गाय नमो नैर्ऋते ॥ ८६॥

वारुण्यां मोहनाय नमः स्मराय नमोऽनिले ।
कौबेर्यामीश्वराय नमः पुष्पबाणायैशान्यां नमः ॥ ८७॥

सर्वदिक्षु नमस्कृत्य मां कन्या पूजयेत् ततः ।
“ॐ कन्दर्पपुरुषाय विद्महे कामदेवाय धीमहि ।

तन्नोऽनङ्गः प्रचोदयात्" ॥ ८८॥

इति चाष्टोत्तरशतजपान् कुर्याद्धि सन्निधौ ।

(Above mantra to be uttered .. 108 times)
नमोऽस्तु कामपतये पुष्पशराय ते नमः ॥ ८९॥

मन्मथायाऽऽनन्ददात्रे नमो रतिकराय ते ।
प्रीतिदाय नमस्तेऽस्तु सर्वबीजाय ते नमः ॥ ९०॥

कान्ताय कान्तरूपाय सर्ववासाय ते नमः ।
पुरुषोत्तमरूपायाऽनङ्गदेवाय ते नमः ॥ ९१॥

अनादिश्रीकृष्णनारायण वाञ्छितकामद ।
हृत्स्थान् पूरय कामान्मे प्रभो कामेश्वरीप्रिय" ॥ ९२॥

स्तुत्वैवं मञ्जरी वारि दातव्ये मम पादयोः ।
गीतवादित्रनृत्यैश्च कर्तव्यश्चोत्सवो महान् ॥ ९३॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः द्वापरयुगसन्तानात्मकस्य तृतीयखण्डे ६३-अध्यायान्तर्गतं पुरुषोत्तमप्रोक्तं कामदेव-रतिस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ३। अध्याय ६३/७९-९३॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 63/79-93..

Proofread by PSA Easwaran

*Purushottamaproktam Kamadevarati Stotram*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*